# कल्पनाशारदीयम्

–डॉ. जयन्त नारळीकर, पुणे.

(पद्मविभूषणोपाधिना गौरविता: विश्वविख्यातशास्त्रज्ञा: डॉ. जयन्त-नारळीकर-महोदया: संस्कृतलेखनेऽपि पारङ्गता इति गुञ्जारवपाठकानां सुविदितम्। अत: पूर्वं कोडागर्वपरिहार: नाम तेषामेका कथा ४२.१ अङ्के प्रकाशिता। अत्र पञ्चतन्त्रपद्धत्यनुसारिणी अभिनव-विषया एका कथा प्रस्तूयते।- प्रसंपादक:)

अथ संयुक्तराज्यदेशे सॅन् फ्रांसिस्को नाम महानगरस्य पोट्रेरो हिलोपनगरे कल्पनानाम्नी बाला स्वपितृभ्यां सह प्रतिवसति स्म। प्रतिप्रात:कालं सा स्वशिक्षिकापरिचारिकया सह बालोद्याने क्रीडनार्थम् अगच्छत्।

एकदा तस्या: गृहे मातुलेय: शरद: स्वमात्रा सह अतिथिभावेनागच्छत्। कल्पनाया: मातुली शरदस्य माता शरदमपि कल्पनया सह बालोद्यानं प्रेषितवती। शरद: बालोद्यानस्थहिंदोलेन आकर्षित: सन् तत्रोपरि विराजमान: अभवत्। यावत् कल्पना स्लाईडोपरि आरोहावरोहं कुर्वती, जंगलजिमम् आरोहन्ती तत: प्लवमाना च तावत् शरद: हिंदोले ध्रुववत् स्थिरत्वेन वर्तते।

उभावपि बालकौ क्रीडामग्नौ दृष्ट्वा कल्पनाया: शिक्षिकापरिचारिका आत्मन: चरिष्णु दूरध्वनियंत्रं समादाय एकस्मिन् उद्यानासने उपाविशत्। सपदि सा स्वसख्या सह दीर्घसंवादे मग्नाऽभवत्।

अथोद्याने एक: सालवृक्ष: आसीत्। तस्य कतिपया: शाखा: नमिता: सत्य: भूतलम् अस्पृशन्। कल्पना शिक्षिकां दूरसंवादमग्नां दृष्ट्वा अनेकदिनेभ्य: आकांक्षां पूरयितुं पर्युत्सुका अभवत्। सा एकां शाखाम् अवनमय्य क्रमश: उपरिगन्तुं प्रवृत्ता।

तां स्वहिंदोलात् अवलोकयन् शरद: अघोषत् अलमवरजे ! किं त्वं न जानासि यत्

अव्यापारेषु व्यापारं यो बाल: कर्तुमिच्छति।
स एव विपदं याति * पोतोत्पाटीव बालक:॥

एतत् श्रुत्वा स्वकार्याद् विरम्य कल्पनाबाला अपृच्छत् 'हे भ्रातः कथमेतत् ? कोऽयं बालकः? कुत्रासीत् स पोतः?'

'शृणु कल्पने !' उवाच शरदः।

अस्त्युत्तरस्यां दिशि कोकणस्य मुंबापुरी नाम पुरी विशाला।
तस्याः परे तोयनिधेस्तटस्था वाणिज्यक्षेत्रेषु च मानदण्डः॥

अथ मुंबापुर्याः उत्तरपूर्वोपनगरे दादरे हिंदूकॉलन्यां पार्थशार्दूलाख्यौ द्वौ भ्रातरौ प्रतिवसतः। तयोः ज्यायान् पार्थः संयमेन वर्तते। कनीयान् शार्दूलस्य महाचंचलः। न कदापि एकस्मिन् आसने निश्चलः उपविशति। तयोः पितरौ, पितामही च शार्दूलम् अनुशासितुं न कदापि यतन्ते।

एकदा ते सर्वे जनाः पार्टीनिमित्तेन अन्यगृहे गतवन्तः। तत्र गृहस्य प्रमुखकोष्ठे वितानादवलंबितम् एकं पोतजालयंत्रं मंदानिलेन दोलायते। उभावपि बालौ तद् यंत्रं कुतूहलेन अवलोकयतः। दश पोताः क्रीडनकप्रतिरूपाः तत्र छत्राकारेण रूपेण किन्तु सप्ततुलादंडात् जालरूपेण अवलंबिताः। पार्थः गृहस्वामिनमपृच्छत् 'महाशय का इयं रचना?'

'इयं चंचलिका ! एते सर्वेऽपि पोताः परस्परं तुलयन्तः छत्ररूपेण स्थिताः मंदानिलेन आंदोलयन्ति। यदि एकोऽपि पोतः स्वस्थानात् भ्रश्यति तदा एतत् यंत्रजालं भग्नं भूत्वा भूमौ पतिष्यति।' गृहस्वामी उवाच।

'विदग्धा खलु इयं रचना!' पार्थः प्रशंसन् उवाच।

'रमणीयाः खलु एते पोताः' उवाच शार्दूलः स्वगतम्। दुर्बोधा आसीत् खलु तस्य पोतजालरचना। अपि तु पीतनीलरक्तवर्णाः ते पोताः तमाकर्षयन्ति। 'प्रांशुलभ्ये फले मोहादुद्बाहुरिव वामनः' शार्दूलः प्लवनेन अत्युन्नतान् पोतान् आग्रहीतुं यतवान्। तस्य प्रयासान् अवलोक्य पार्थः अवदत् 'अलं मर्कटचेष्टया। यदि त्वं पोतजालं भेदयसि तर्हि अत्र गृहस्वामिनी अथवा स्वगृहे आवयोः माता त्वाम् अनुशासिष्यति।'

शार्दूलः सस्मितम् उवाच ।

पार्थ नैवेह नामुत्र शासनं मेऽपि संभवेत्।
न हि बंधुः कनिष्ठोऽपि दुर्गतिं तात गच्छति।।

अथ शार्दूलं पोतजालच्छेदनात् निवर्तयितुकामः पार्थः पुनरुवाच 'तात! जानेऽहं परमं लालितोऽसि पितृभ्याम्। अपि तु क्षम्यापराधानां सीमा वर्तते। अति सर्वत्र वर्जयेत्। किं न जानासि यत्

अतिरेको न कर्तव्यः संयमः परमो गुणः।
उष्ट्रस्य सबलस्यापि पृष्ठं भग्नं तृणेन तु।।'

'कथमेतत् ?' पृष्टवान् शार्दूलः।

पार्थ उवाच।

'अस्त्यरबस्ताने शारजा नाम नगरम्। तत्र अबुलहसनो नाम एको महाकृपणः श्रेष्ठी प्रतिवसति स्म। प्रतिव्यवहारं न्यूनतमः अर्थव्ययः कथं भवेदिति तस्य प्रयत्नः आसीत्।

एकदा स्वाश्वखाद्यार्थं तृणं क्रेतुं सः आपणम् अगच्छत्। तत्र तेन महायत्नेन समयं कृत्वा विशालः तृणनिकरः क्रीतः। तं निकरं स्वगृहं नेतुं तेन क्षेत्रपालः पृष्टः तव 'उष्ट्रं कियत्या भृत्या परिक्रीणामि?' 'बाढम्। अहं मन्ये निकरमेनं वोढुं नैकः उष्ट्रः पर्याप्तः अपि तु उष्ट्रौ आवश्यकौ।'

'कोऽस्ति ते पणः प्रत्युष्ट्रम् ?'

'एको दीनारः' उवाच क्षेत्रपालः।

तृणनिकरं पुनरपि अवलोक्य अबुलहसनः उवाच 'देहि मे उष्ट्रमेकमेव।' ससंदेहः क्षेत्रपालः उष्ट्रमेकमानीतवान्। अबुलहसनः तस्य पृष्ठोपरि तृणनिकरं रचयितुमारभत। अर्धेन निकरेणैव उष्ट्रः अतीव नमितः त्रस्तश्चासीत्। 'अलम् अधिकभारवहनेन। उष्ट्रोऽयम् असमर्थः पूर्णं निकरं नेतुम्।' क्षेत्रपालः उवाच। अपि तु कृपणवृत्त्या प्रेरितः अबुलहसनः उवाच 'अहं क्रमशः तृणमेकं उष्ट्रपृष्ठोपरि अतिसौम्यभावेन निवेशयामि।' इत्युक्त्वा असौ तृणमेकम् उष्ट्रोपरि निहितवान्।

अपि तु भारातिशयेन भग्नपृष्ठः उष्ट्रो वराकः भूमौ आपतितः प्राणान् च त्यक्तवान्।

'तव कृपणत्वेन मृतो मे उष्ट्रः। प्रदेहि मे तस्य मूल्यं दीनारशतम्।' इति उक्त्वा क्षेत्रपालः विलापेन क्षोभेण च आक्रोशितवान्। सपदि तत्र महाजनसमुदायः समायातः। सर्वेपि अबुलहसनं दोषिणं निर्णीतवन्तः। तेषां निर्णयेन अबुलहसनः क्षेत्रपालाय अर्धशतदीनारं दातुं सनिर्बन्धं प्रचोदितः। अतिकृपणभावस्य दुष्परिणामः तेन भुक्तः।

'अतोऽहं ब्रवीमि यदतिरेको न कर्तव्यः' इत्युक्त्वा पार्थः अन्यकार्यार्थं गृहान्तःपुरं गतवान्।

पार्थोपदेशेनाप्रभावितः शार्दूलस्तु मंचकमेकम् आकर्षयन् तत्रोपरि स्थितः सन् नीलपोतमेकम् उत्पाटयामास। सपदि विनष्टसंतुलनेन संपूर्णपोतजालं तस्य मस्तकोपरि आपतितम्। जालबद्धशिरा असौ महाक्रोशं कृतवान्। गृहस्वामिनी तस्य माता च सपदि तत्रागते। तयोर्वाक्ताडनेन अनुशासनशब्दस्य सारः शार्दूलेन प्रथममेव अनुभूतः।

एतत् श्रुत्वा कल्पना उवाच।

'सर्वमेतत् ऋतं मन्ये यन्मां वदसि बांधव।
स्थितास्मि गतसंदेहा करिष्ये वचनं तव॥'

इत्युक्त्वा सा बाला वृक्षादवतरन्ती शरदसमीपे अपरे हिंदोले दोलनार्थम् आरुढा।

* टिप्पणी – पोतजालयन्त्रं नाम गृहपटलेऽवलम्बितः क्रीडनकविशेषः। एतस्मिन् यन्त्रे दशद्वादशा अल्पाकारा नौकाः परस्परसंलग्नाः सन्ति। ताश्च सूक्ष्मतन्त्र्या वा सूक्ष्मसूत्रेण वा संलग्ना गृहपटलतले लम्बमानाः संयोज्यन्ते। इदं यन्त्रं कक्षाभ्यन्तरे मन्दानिलवशाद् वृत्ताकारं परिभ्रमति। किन्तु नौकानां रचनाविन्यासे स्वल्पोऽपि दोषोऽशेषं यन्त्रम् अधः पातयति।